# Shri Kamalatmika Khadgamala Stotram

# श्रीकमलात्मिका खड्गमालास्तोत्रम्

## Document Information

Text title : Shri Kamalatmika Khadgamala Stotram

File name : kamalAtmikAkhaDgamAlAstotram.itx

Category : devii, dashamahAvidyA, devI

Location : doc_devii

Latest update : November 7, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# श्रीकमलात्मिका खड्गमालास्तोत्रम्

अस्य श्रीकमलात्मिका खड्गमालास्तोत्रमहामन्त्रस्य
भृगुदक्षब्रह्मऋषयः । नानाछन्दांसि ।
श्रीकमलात्मिका देवता । श्रीं बीजम् । ऐं शक्तिः । ह्रीं कीलकम् ।
अखण्ड ऐश्वर्यं आयुरारोग्यप्राप्त्यर्थे जपे विनियोगः ॥

ध्यानं -
कान्त्या काञ्चनसन्निभां हिमगिरिप्रख्यैश्चतुर्भिर्गजैः
हस्तोत्क्षिप्तहिरण्मयामृतघटैरासिच्यमानां श्रियम् ।
बिभ्राणां वरमब्जयुग्ममभयं हस्तैः किरीटोज्ज्वलां
क्षौमाबद्ध नितम्बबिम्बललितां वन्देऽरविन्दस्थिताम् ॥

ॐ कमलात्मिकायै नमः ।

वासुदेवमयि, सङ्कर्षणमयि, प्रद्युम्नमयि, अनिरुद्धमयि, श्रीधरमयि,
हृषीकेशमयि, वैकुण्ठमयि, विश्वरूपमयि, प्रथमावरणरूपिणि
सर्वमाङ्गल्यप्रदचक्रस्वामिनि अनन्तसमेत श्रीकमलात्मिका ॥ १॥

सलिलमयि, गुग्गुलमयि, कुरुण्टकमयि, शङ्खनिधिमयि, वसुधामयि,
पद्मनिधिमयि, वसुमतिमयि, जह्नुसुतामयि, सूर्यसुतामयि,
द्वितीयावरणरूपिणि सर्वधनप्रदचक्रस्वामिनि अनन्तसमेत
श्रीकमलात्मिका ॥ २॥

बलाकमयि, विमलामयी, कमलामयि, वनमालिकामयि, विभीषिकामयि,
मालिकामयि, शाङ्करीमयि, वसुमालिकामयि तृतीयावरणरूपिणि
सर्वशक्तिप्रदचक्रस्वामिनि अनन्तसमेत श्रीकमलात्मिका ॥ ३॥

भारतीमयि, पार्वतीमयि, चान्द्रीमयि, शचीमयि, दमकमयि, उमामयि,
श्रीमयि, सरस्वतीमयि, दुर्गामयि, धरणीमयि, गायत्रिमयि, देवीमयि,
उषामयि, चतुर्थावरणरूपिणि सर्वसिद्धिप्रदचक्रस्वामिनि अनन्तसमेत

श्रीकमलात्मिका ॥ ४॥

अनुराग महालक्ष्मी बाणमयि, संवाद् महालक्ष्मी बाणमयि, विजया महालक्ष्मी बाणमयि, वल्लभा महालक्ष्मी बाणमयि, मदा महालक्ष्मी बाणमयि, हर्षा महालक्ष्मी बाणमयि, बला महालक्ष्मी बाणमयि, तेजा महालक्ष्मी बाणमयि, पञ्चमावरणरूपिणि सर्वसंक्षोभणचक्रस्वामिनि अनन्तसमेत श्रीकमलात्मिका ॥ ५॥

ब्राह्मिमयि, महेश्वरीमयि, कौमारीमयि, वैष्णवीमयि, वाराहीमयि, इन्द्राणीमयि, चामुण्डामयि, महालक्ष्मीमयि, षष्टावरणरूपिणि सर्वसौभाग्यदायकचक्रस्वामिनि अनन्तसमेत श्रीकमलात्मिका ॥ ६॥

ऐरावतमयि, पुण्डरीकमयि, वामनमयि, कुमुदमयि, अञ्जनमयि, पुष्पदन्तमयि, सार्वभौममयि, सुप्रतीकमयि, सप्तमावरणरूपिणि सर्वाशापरिपूरकचक्रस्वामिनि अनन्तसमेत श्रीकमलात्मिका ॥ ७॥

सूर्यमयि, सोममयि, भौममयि, बुधमयि, बृहस्पतिमयि, शुक्रमयि, शनेश्चरमयि, राहुमयि, केतुमयि, अष्टमावरणरूपिणि सर्वरोगहरचक्रस्वामिनि अनन्तसमेत श्रीकमलात्मिका ॥ ८॥

लं पृथ्वीमयि, रं अग्निमयि, हं आकाशमयि, वं उदकमयि, यं वायुमयि नवमावरणरूपिणि सर्वानन्दमयिचक्रस्वामिनि अनन्तसमेत श्रीकमलात्मिका ॥ ९॥

निवृतिमयि, प्रतिष्ठामयि, विद्यामयि, शान्तिमयि, दशमावरणरूपिणि सर्वशापहरचक्रस्वामिनि अनन्तसमेत श्रीकमलात्मिका ॥ १०॥

गायत्रीसहित ब्रह्ममयि, सावित्रीसहित विष्णुमयि, सरस्वतीसहित रुद्रमयि, लक्ष्मी समेत कुबेरमयि, रतिसहित काममयि, पुष्टिसहित विघ्नराजमयि, शङ्खनिधिसहित वसुधामयि, पद्मनिधिसहित वसुमतिमयि, गायात्र्यादिसहित कमलात्मिका, दिवौघुगुरुरूपिणि सिध्दौघगुरुरूपिणि मानवौघगुरुरूपिणि, श्रीगुरुरूपिणि, परमगुरुरूपिणि परमेष्ठिगुरुरूपिणि, परापरगुरुरूपिणि, अणिमासिद्धे, लघिमासिद्धे, महिमासिद्धे, ईशित्वसिद्धे, वशित्वसिद्धे, प्राकाम्यसिद्धे, भुक्तिसिद्धे, इच्छासिद्धे, प्राप्तिसिद्धे, सर्वकामसिद्धे, एकादशावरणरूपिणि सर्वार्थसाधकचक्रस्वामिनि अनन्तसमेत श्रीकमलात्मिका ॥ ११॥

वराभयमयि, वटुकमयि, योगिनीमयि, क्षेत्रपालमयि, गणपतिमयि,
अष्टवसुमयि, द्वादशादित्यमयि, एकादशरुद्रमयि, सर्वभूतमयि,
श्रुति-स्मृती-धृति-श्रद्धा-मेधामयि, वज्रसहित इन्द्रमयि,
शक्तिसहित अग्निमयि, दण्डसहित यममयि, खड्गसहित निर्ऋतिमयि,
पाशसहित वरुणमयि, अङ्कुशसहित वायुमयि, गदासहित सोममयि,
शूलसहित ईशानमयि, पद्मसहित ब्रह्ममयि, चक्रसहित अनन्तमयि,
द्वादशावरणरूपिणि त्र्यैलोक्यमोहनचक्रस्वामिनि अनन्तसमेत
सदाशिवभैरवसेवित श्रीकमलात्मिका नमस्ते नमस्ते नमस्ते नमः ॥ १२॥

इति श्रीकमलात्मिका खड्गमालास्तोत्रं सम्पूर्णम् ।

---

*Shri Kamalatmika Khadgamala Stotram*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*